# Shri Batukabhairava Sahasranamastotram 1-1

# શ્રીબટુકભૈરવસહસ્રનામસ્તોત્રમ્ ૧-૧

## Document Information

Text title : Batukabhairava Sahasranamastotram 1-1

File name : baTukabhairavasahasrabhairavatantra.itx

Category : sahasranAma, shiva

Location : doc_shiva

Transliterated by : Rajnarayanan C K krajnara at gmail.com

Proofread by : Rajnarayanan C K krajnara at gmail.com

Description-comments : bhairavatantra, See corresponding nAmAvalI.

Latest update : November 16, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 27, 2025

*sanskritdocuments.org*

# શ્રીબટુકભૈરવસહસ્રનામસ્તોત્રમ્ ૧-૧

દેવ્યુવાચ -
દેવેશ ભક્તિસુલભ દેવનાયકવન્દિત ।
ભક્તાનાં કામ્યસિદ્ધ્યર્થં નિદાનં બ્રૂહિ તત્ત્વતઃ ॥ ૧॥

વિનૈવ ન્યાસજાલેન પૂજનેન વિના ભવેત્ ।
વિનાઽપિ કાયક્લેશેન વિના જપ્યેન ચેશ્વર ॥ ૨॥

શ્રીમહાદેવ ઉવાચ -
અસ્ય શ્રીબટુકભૈરવસહસ્રનામમાલામન્ત્રસ્ય બ્રહ્માનન્દભૈરવઋષિઃ
અનુષ્ટુપ્છન્દઃ બટુકભૈરવો દેવતા ।
વં બીજં હ્રીં શક્તિઃ અભીષ્ટફલસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

ૐ બટુકઃ કામદો નાથોઽનાથપ્રિયઃ પ્રભાકરઃ ।
ભૈરવો ભીતિહા દર્પઃ કન્દર્પો મીનકેતનઃ ॥ ૩॥

રુદ્રો વટુર્વિભૂતીશો ભૂતનાથઃ પ્રજાપતિઃ ।
દયાલુઃ ક્રૂર ઈશાનો જનીશો લોકવલ્લભઃ ॥ ૪॥

દેવો દૈત્યેશ્વરો વીરોવીરવન્દ્યો દિવાકરઃ ।
બલિપ્રિયઃ સુરશ્રેષ્ઠઃ કનિષ્ઠઃ કનિષ્ઠશિશુઃ ॥ ૫॥

મહાબલો મહાતેજા વિત્તજિત્ દ્યુતિવર્ધનઃ ।
તેજસ્વી વીર્યવાન્વૃદ્ધો વિવૃદ્ધો ભૂતનાયકઃ ॥ ૬॥

કાલઃ કપાલકામાદિવિકારઃ કામમર્દનઃ ।
કામિકારમણઃ કામી નાયકઃ કાલિકાપ્રિયઃ ॥ ૭॥

કાલીશઃ કામિનીકાન્તઃ કાલિકાનન્દવર્ધનઃ ।
કાલિકાહૃદયજ્ઞાની કાલિકાતનયો નયઃ ॥ ૮॥

ખગેશઃ ખેચરઃ ખેટો વિશિષ્ટઃ ખેટકપ્રિયઃ ।

કુમારઃ ક્રોધનઃ કાલાપ્રિયઃ પર્વતરક્ષકઃ ॥ ૯॥

ગણેજ્યો ગણનો ગૂઢો ગૂઢાશયો ગણેશ્વરઃ ।
ગણનાથો ગણશ્રેષ્ઠો ગણમુખ્યો ગણપ્રિયઃ ॥ ૧૦॥

ઘોરનાથો ઘનશ્યામો ઘનમૂર્તિર્ઘનાત્મકઃ ।
ઘોરનાશો ઘનેશાનો ધનપતિર્ધનાત્મકઃ ॥ ૧૧॥

ચમ્પકાભાશ્ચિરઞ્જીવો ચારુવેષશ્ચરાચરઃ ।
અન્ત્યોઽચિન્ત્યગણો ધીમાન્સુચિત્તસ્થશ્ચિતીશ્વરઃ ॥ ૧૨॥

છત્રી છત્રપતિશ્છત્રછિન્નનાસામનઃ પ્રિયઃ ।
છિન્નાભશ્છિન્નસન્તાપશ્છર્દિરાચ્છર્દનન્દનઃ ॥ ૧૩॥

જનો જિષ્ણુર્જટીશાનો જનાર્દનો જનેશ્વરઃ ।
જનૌકો જનસન્તોષો જનજાડ્ય વિનાશનઃ ॥ ૧૪॥

જનપ્રસ્થો જનારાધ્યો જનાધ્યક્ષો જનપ્રિયઃ ।
જીવહા જીવદો જન્તુર્જીવનાથો જનેશ્વરઃ ॥ ૧૫॥

જયદો જિત્વરો જિષ્ણુર્જયશ્રીઃ જયવર્ધનઃ ।
જયાભૂમિર્જયાકારો જયહેતુર્જયેશ્વરઃ ॥ ૧૬॥

ઝઙ્કારહૃદવાન્તાત્મા ઝઙ્કારહેતુરાત્મભૂઃ ।
ઞાભૈશ્વરી હરિર્ભર્તા વિભર્તા ભૃત્યકેશ્વરઃ ॥ ૧૭॥

ઠીકારહૃદયોઆત્મ ઠઙ્કેશાષ્ટકનાયકઃ ।
ઠકારભૂષ્ઠરન્ધ્રેશાષ્ઠિરીશાષ્ઠકુરપતિઃ ॥ ૧૮॥

ડુડીડક્કાપ્રિયઃ પાન્થો ડુણ્ઢિરાજો નિરન્તકઃ ।
તામ્રસ્તમીશ્વરસ્ત્રોતા તીર્થજાતસ્તડિત્પ્રભુઃ ॥ ૧૯॥

ઋક્ષરઃ ઋક્ષકસ્તભસ્તાર્ક્ષ્યકસ્તમ્ભદેશ્વરઃ ।
સ્થલજઃ સ્થાવરસ્સ્થાતા સ્થિરબુદ્ધિઃ સ્થિતેન્દ્રિયઃ ॥ ૨૦॥

સ્થિરજ્ઞાતિઃ સ્થિરપ્રીતિઃ સ્થિરસ્થિતિઃ સ્થિરાશયઃ ।
દરો દામોદરો દમ્ભો દાડિમી કુસુમપ્રિયઃ ॥ ૨૧॥

દરિદ્રહાદિમી દિવ્યો દિવ્યદેહો દિવપ્રભઃ ।
દીક્ષાકારો દિવાનાથો દિવસેશો દિવાકરઃ ॥ ૨૨॥

દીર્ઘશાન્તિર્દલજ્યોતિર્દલેશો દલસુન્દરઃ ।
દલપ્રિયો દલાભાશો દલશ્રેષ્ઠો દલપ્રભુઃ ॥ ૨૩॥

દલકાન્તિર્દલાકારો દલસેવ્યો દલાર્ચિતઃ ।
દીર્ઘબાહુર્દલશ્રેષ્ઠો દલલૂધ્વદલાકૃતિઃ ॥ ૨૪॥

દાનવેશો દયાસિન્ધુર્દયાલુર્દીનવલ્લભઃ ।
ધનેશો ધનદો ધર્મો ધનરાજો ધનપ્રિયઃ ॥ ૨૫॥

ધનપ્રદો ધનાધ્યક્ષો ધનમાન્યો ધનઞ્જયઃ ।
ધીવરો ધાતુકો ધાતા ધૂમ્રો ધૂમચ્છવિવર્ધનઃ ॥ ૨૬॥

ધનિષ્ઠો ધનલચ્છત્રી ધનકામ્યો ધનેશ્વરઃ ।
ધીરો ધીરતરો ધેનુર્ધરિશો ધરણીપ્રભૂઃ ॥ ૨૭॥

ધરાનાથો ધરાધીશો ધરણીનાયકો ધરઃ ।
ધરાકાન્તો ધરાપાલો ધરણીભૃદ્ધરાપ્રિયઃ ॥ ૨૮॥

ધરાધારો ધરાધૃષ્ણો ધૃતરાષ્ટ્રો ધનીશ્વરઃ ।
નારદો નરદો નેતા નતિપૂજ્યો નતિપ્રભૂઃ ॥ ૨૯॥

નતિલભ્યો નતીશાનો નતિલધ્વો નતીશ્વરઃ ।
પાણ્ડવઃ પાર્થસમ્પૂજ્યઃ પાથોદઃ પ્રણતઃ પૃથુઃ ॥ ૩૦॥

પુરાણઃ પ્રાણદો પાન્થો પાઞ્ચાલી પાવકપ્રભુઃ ।
પૃથિવીશઃ પૃથાસૂનુઃ પૃથિવી ભૃત્યકેશ્વરઃ ॥ ૩૧॥

પૂર્વશૂરપતિઃ શ્રેયાન્ પ્રીતિદઃ પ્રીતિવર્ધનઃ ।
પાર્વતીશઃ પરેશાનઃ પાર્વતીહૃદયપ્રિયઃ ॥ ૩૨॥

પાર્વતીરમણઃ પૂતઃ પવિત્રઃ પાપનાશનઃ ।
પાત્રીપાત્રાલિસન્તુષ્ટઃ પરિતુષ્ટઃ પુમાન્પ્રિયઃ ॥ ૩૩॥

પર્વેશઃ પર્વતાધીશઃ પર્વતો નાયકાત્મજઃ ।
ફાલ્ગુનઃ ફલ્ગુનો નાથઃ ફણેશઃ ફણિરક્ષકઃ ॥ ૩૪॥

ફણીપતિઃ ફણીશાનઃ ફણાળિન્દઃ ફણાકૃતિઃ ।
બલભદ્રો બલી બાલો બલધીર્બલવર્ધનઃ ॥ ૩૫॥

બલપ્રાણો બલાધીશો બલિદાન પ્રિયઙ્કરઃ ।
બલિરાજો બલિપ્રાણો બલિનાથો બલિપ્રભુઃ ॥ ૩૬॥

બલી બલશ્ચ બાલેશો બાલકઃ પ્રિયદર્શનઃ ।
ભદ્રી ભદ્રપ્રદો ભીમો ભીમસેનો ભયઙ્કરઃ ॥ ૩૭॥

ભવ્યો ભવ્યપ્રિયો ભૂતપતિર્ભૂતવિનાશકઃ ।
ભૂતેશો ભૂતિદો ભર્ગો ભૂતભવ્યો ભવેશ્વરઃ ॥ ૩૮॥

ભવાનીશો ભવેશાનો ભવાનીનાયકો ભવઃ ।
મકારો માધવો માની મીનકેતુર્મહેશ્વરઃ ॥ ૩૯॥

મહર્ષિર્મદનો મન્થો મિથુનેશોઽમરાધિપઃ ।
મરીચિર્મજુલો મોહો મોહહા મોહમર્દનઃ ॥ ૪૦॥

મોહકો મોહનો મેધાપ્રિયો મોહવિનાશકઃ ।
મહીપતિર્મહેશાનો મહારાજો મહેશ્વરઃ ॥ ૪૧॥

મહીશ્વરો મહીપાલો મહીનાથો મહીપ્રિયઃ ।
મહીધરો મહીશાનો મધુરાજો મુનિપ્રિયઃ ॥ ૪૨॥

મૌની મૌનધરો મેધો મન્દારો મતિવર્ધનઃ ।
મતિદો મન્ધરો મન્ત્રો મન્ત્રીશો મન્ત્રનાયકઃ ॥ ૪૩॥

મેધાવી માનદો માની માનહા માનમર્દનઃ ।
મીનગો મકરાધીશો મકરો મણિરઞ્જિતઃ ॥ ૪૪॥

મણિરમ્યો મણિભ્રાતા મણિમણ્ડલ મણ્ડિતઃ ।
મન્ત્રિણો મન્ત્રદો મુગ્ધો મોક્ષદો મોક્ષવલ્લભઃ ॥ ૪૫॥

મલ્લો મલ્લપ્રિયો મન્ત્રો મેલકો મેલનપ્રભઃ ।
મલ્લિકાગન્ધરમણો માલતીકુસુમપ્રભઃ ॥ ૪૬॥

માલતીશો મઘાધીશો માઘમૂર્તિર્મઘેશ્વરઃ ।
મૂલાભો મૂલહા મૂલો મૂલદો મૂલસમ્ભવઃ ॥ ૪૭॥

માણિક્યરોચિઃ સમ્મુગ્ધો મણિકૂટો મણિપ્રિયઃ ।
મુકુન્દો મદનો મન્દો મદવન્દ્યો મનુપ્રભુઃ ॥ ૪૮॥

મનસ્સ્થો મેનકાધીશો મેનકા પ્રિયદર્શનઃ ।
યમોઽપિ યામલો યેતા યાદવો યદુનાયકઃ ॥ ૪૯॥

યાચકો યજ્ઞકો યજ્ઞો યજ્ઞેશો યજ્ઞવર્ધનઃ ।

રમાપતી રમાધીશો રમેશો રામવલ્લભઃ ॥ ૫૦॥

રમાપતી રમાનાથો રમાકાન્તો રમેશ્વરઃ ।
રેવતી રમણો રામો રામેશો રામનન્દનઃ ॥ ૫૧॥

રમ્યમૂર્તી રતીશાનો રાકાયા નાયકો રવિઃ ।
લક્ષ્મીધરો લલજ્જિહ્વો લક્ષ્મીબીજજપે રતઃ ॥ ૫૨॥

લમ્પટો લમ્બરાજેશો લમ્બદેશો લકારભૂઃ ।
વામનો વલ્લભો વન્દ્યો વનમાલી વલેશ્વરઃ ॥ ૫૩॥

વશસ્થો વનગો વન્ધ્યો વનરાજો વનાહ્વયઃ ।
વનેચરો વનાધીશો વનમાલા વિભૂષણઃ ॥ ૫૪॥

વેણુપ્રિયો વનાકારો વનરાધ્યો વનપ્રભુઃ ।
શમ્ભુઃ શઙ્કરસન્તુષ્ટઃ શમ્બરારિઃ સનાતનઃ ॥ ૫૫॥

શબરીપ્રણતઃ શાલઃ શિલીમુખધ્વનિપ્રિયઃ ।
શકુલઃ શલ્કઃ શીલઃ શીતિરશ્મિ સિતાંશુકઃ ॥ ૫૬॥

શીલદઃ શીકરઃ શીલઃ શાલશાલી શનૈશ્ચરઃ ।
સિધ્દઃ સિદ્ધિકરઃ સાધ્યઃ સિદ્ધિભૂઃ સિદ્ધિભાવનઃ ॥ ૫૭॥

સિધ્દાન્તવલ્લભઃ સિન્ધુઃ સિન્ધુતીરનિષેવકઃ ।
સિન્ધુપતિઃ સુરાધીશઃ સરસીરુહલોચનઃ ॥ ૫૮॥

સરિત્પતિસ્સરિત્સંસ્થઃ સરઃ સિન્ધુસરોવરઃ ।
સખા વીરયતિઃ સૂતઃ સચેતા સત્પતિઃ સિતઃ ॥ ૫૯॥

સિન્ધુરાજઃ સદાભૂતઃ સદાશિવઃ સતાઙ્ગતિઃ ।
સદૃશઃ સાહસી શૂરઃ સેવ્યમાનઃ સતીપતિઃ ॥ ૬૦॥

સૂર્યઃ સૂર્યપતિઃ સેવ્યઃ સેવાપ્રિયઃ સનાતનઃ ।
સનીશઃ શશિનાથઃ સતીસેવ્યઃ સતીરતઃ ॥ ૬૧॥

સતીપ્રાણઃ સતીનાથસ્સતીસેવ્યઃ સતીશ્વરઃ ।
સિધ્દરાજઃ સતીતુષ્ટઃ સચિવઃ સવ્યવાહનઃ ॥ ૬૨॥

સતીનાયકસન્તુષ્ટઃ સવ્યસાચી સમન્તકઃ ।
સચિતઃ સર્વસન્તોષી સર્વારાધન સિદ્ધિદઃ ॥ ૬૩॥

સર્વારાધ્યઃ શચીવાચ્યઃ સતીપતિઃ સુસેવિતઃ ।
સાગરઃ સગરઃ સાર્ધઃ સમુદ્રપ્રિયદર્શનઃ ॥ ૬૪॥

સમુદ્રેશઃ પરો નાથઃ સરસીરુહલોચનઃ ।
સરસીજલદાકારઃ સરસીજલદાર્ચિતઃ ॥ ૬૫॥

સામુદ્રિકઃ સમુદ્રાત્મા સેવ્યમાનઃ સુરેશ્વરઃ ।
સુરસેવ્યઃ સુરેશાનઃ સુરનાથ સ્સુરેશ્વરઃ ॥ ૬૬॥

સુરાધ્યક્ષઃ સુરારાધ્યઃ સુરવૃન્દવિશારદઃ ।
સુરશ્રેષ્ઠઃ સુરપ્રાણઃ સુરસિન્ધુનિવાસિનઃ ॥ ૬૭॥

સુધાપ્રિયઃ સુધાધીશઃ સુધાસાધ્યઃ સુધાપતિઃ ।
સુધાનાથઃ સુધાભૂતઃ સુધાસાગરસેવિતઃ ॥ ૬૮॥

હાટકો હીરકો હન્તા હાટકો રુચિરપ્રભઃ ।
હવ્યવાહો હરિદ્રાભો હરિદ્રારસમર્દનઃ ॥ ૬૯॥

હેતિર્હેતુર્હરિર્નાથો હરિનાથો હરિપ્રિયઃ ।
હરિપૂજ્યો હરિપ્રાણો હરિહૃષ્ટો હરિદ્રકઃ ॥ ૭૦॥

હરીશો હન્ત્રિકો હીરો હરિનામ પરાયણઃ ।
હરિમુગ્ધો હરીરમ્યો હરિદાસો હરીશ્વરઃ ॥ ૭૧॥

હરો હરપતિ ર્હારો હરિણીચિત્તહારકઃ ।
હરો હિતો હરિપ્રાણો હરિવાહનશોભનઃ ॥ ૭૨॥

હંસો હાસપ્રિયો હુંહું હુતભુક્ હુતવાહનઃ ।
હુતાશનો હવી હિક્કો હાલાહલહલાયુધઃ ॥ ૭૩॥

હલાકારો હલીશાનો હલિપૂજ્યો હલિપ્રિયઃ ।
હરપુત્રો હરોત્સાહો હરસૂનુર્હરાત્મજઃ ॥ ૭૪॥

હરબન્ધો હરાધીશો હરાન્તકો હરાકૃતિઃ ।
હરપ્રાણો હરમાન્યો હરવૈરિવિનાશનઃ ॥ ૭૫॥

હરશત્રુર્હરાભ્યર્ચ્યો હુઙ્કારો હરિણીપ્રિયઃ ।
હાટકેશો હરેશાનો હાટકપ્રિયદર્શનઃ ॥ ૭૬॥

હાટકો હાટકપ્રાણો હાટભૂષણભૂષકઃ ।
હેતિદો હેતિકો હંસો હંસાગતિરાહ્વયઃ ॥ ૭૭॥

હંસીપતિર્હરોન્મત્તો હંસીશો હરવલ્લભઃ ।
હરપુષ્પપ્રભો હંસીપ્રિયો હંસવિલાસિતઃ ॥ ૭૮॥

હરજીવરતો હારી હરિતો હરિતામ્પતિઃ ।
હરિત્પ્રભુર્હરિત્પાલો હરિદન્તરનાયકઃ ॥ ૭૯॥

હરિદીશો હરિત્પ્રાયો હરિપ્રિયપ્રિયો હિતઃ ।
હેરમ્બો હુઙ્કૃતિક્રુદ્ધો હેરમ્બો હુઙ્કૃતી હરી ॥ ૮૦॥

હેરમ્બ પ્રાણસંહર્તા હેરમ્બહૃદયપ્રિયઃ ।
ક્ષમાપતિઃ ક્ષણં ક્ષાન્તઃ ક્ષુરધારઃ ક્ષિતીશ્વરઃ ॥ ૮૧॥

ક્ષિતીશઃ ક્ષિતિભૃત્ ક્ષીણઃ ક્ષિતિપાલઃ ક્ષિતિપ્રભુઃ ।
ક્ષિતીશાનઃ ક્ષિતિપ્રાણઃ ક્ષિતિનાયક સાત્પ્રિયઃ ॥ ૮૨॥

ક્ષિતિરાજઃ ક્ષણાધીશઃ ક્ષણપતિઃ ક્ષણેશ્વરઃ ।
ક્ષણપ્રિયઃ ક્ષમાનાથઃ ક્ષણદાનાયકપ્રિયઃ ॥ ૮૩॥

ક્ષણિકઃ ક્ષણકાધીશઃ ક્ષણદાપ્રાણદઃ ક્ષમી ।
ક્ષમઃ ક્ષોણીપતિઃ ક્ષોભઃ ક્ષોભકારી ક્ષમાપ્રિયઃ ॥ ૮૪॥

ક્ષમાશીલઃ ક્ષમારૂપઃ ક્ષમામણ્ડલમણ્ડિતઃ ।
ક્ષમાનાથઃ ક્ષમાધારઃ ક્ષમાધારી ક્ષમાધરઃ ॥ ૮૫॥

ક્ષેમક્ષીણરુજાક્ષુદ્રઃ ક્ષુદ્રપાલવિશારદઃ ।
ક્ષુદ્રાસનઃ ક્ષણાકારઃ ક્ષીરપાનકતત્પરઃ ॥ ૮૬॥

ક્ષીરશાયી ક્ષણેશાનઃ ક્ષોણીભૂત્ ક્ષણદોત્સવઃ ।
ક્ષેમઙ્કરક્ષમાળુબ્ધઃ ક્ષમાહૃદયમણ્ડનઃ ॥ ૮૭॥

નીલાદ્રિરુચિરાવેશઃ નીલોપચિત સન્નિભઃ ।
નાલમણિપ્રભારમ્યો નીલભૂષણભૂષિતઃ ॥ ૮૮॥

નીલવર્ણો નીલભ્રુવો મુણ્ડમાલાવિભૂષિતઃ ।
મુણ્ડસ્થો મુણ્ડસન્તુષ્ટો મુણ્ડમાલાધરો નયઃ ॥ ૮૯॥

દિગ્વાસા વિદિતાકારો દિગમ્બરવરપ્રદઃ ।
દિગમ્બરીશ આનન્દી દિગ્બન્ધ પ્રિયનન્દનઃ ॥ ૯૦॥

પિઙ્ગલૈકજટો હૃષ્ટો ડમરૂવાદનપ્રિયઃ ।

શ્રેણીકરઃ શ્રેણાશાયઃ ખડ્ગધૃક્ ખડ્ગપાલકઃ ॥ ૯૧॥

શૂલહસ્તા મતઙ્ગાભી માતઙ્ગોત્સવસુન્દરઃ ।
અભયઙ્કર ઊર્વઙ્ગો લઙ્કાપતિર્વિનાયકઃ ॥ ૯૨॥

નગેશયો નગેશાનો નાગમણ્ડલમણ્ડિતઃ ।
નાગાકારો નાગધીશો નાગશાયી નગપ્રિયઃ ॥ ૯૩॥

ઘટોત્સવો ઘટાકારો ઘણ્ટાવાદ્ય વિશારદઃ ।
કપાલપાણિ રમ્ભેશઃ કપાલાશનશારદઃ ॥ ૯૪॥

પદ્મપાણિઃ કરાલાસ્ય સ્ત્રિનેત્રો નાગવલ્લભઃ ।
કિઙ્કિણીજાલસંહૃષ્ટો જનાશયો જનનાયકઃ ॥ ૯૫॥

અપમૃત્યુહરો માયામોહમૂલવિનાશકઃ ।
આયુકઃ કમલાનાથઃ કમલાકાન્તવલ્લભઃ ॥ ૯૬॥

રાજ્યદો રાજરાજેશો રાજવત્સદશોભનઃ ।
ડાકિનીનાયકો નિત્યો નિત્યધર્મપરાયણઃ ॥ ૯૭॥

ડાકિનીહૃદયજ્ઞાની ડાકિનીદેહનાયકઃ ।
ડાકિનીપ્રાણદઃ સિદ્ધઃ શ્રદ્ધેયચરિતોવિભુઃ ॥ ૯૮॥

હેમપ્રભો હિમેશાનો હિમાનીપ્રિયદર્શનઃ ।
હેમદો નર્મદો માની નામધેયો નગાત્મજઃ ॥ ૯૯॥

વૈકુણ્ઠો વાસુકિપ્રાણો વાસુકીકણ્ઠભૂષણઃ ।
કુણ્ડલીશો મુખધ્વંસી મખરાજો મખેશ્વરઃ ॥ ૧૦૦॥

મખાકારો મખાધીશો મખમાલિવિભૂષણઃ ।
અમ્બિકાવલ્લભો વાણીમતિર્વાણીવિશારદઃ ॥ ૧૦૧॥

વાણીશો વચનપ્રાણો વચનસ્થો વનપ્રિયઃ ।
વેલાધારો દિશામીશો દિગ્ભાગો હિ દિગીશ્વરઃ ॥ ૧૦૨॥

પટુપ્રિયો દુરારાધ્યો દારિદ્ર્યભઞ્જનક્ષમઃ ।
તર્કતર્કપ્રિયોઽતર્ક્યો વિત્તર્ક્યસ્તર્કવલ્લભઃ ॥ ૧૦૩॥

તર્કસિદ્ધઃ સુસિદ્ધાત્મા સિદ્ધદેહો ગ્રહાસનઃ ।
ગ્રહગર્વો ગ્રહેશાનો ગન્ધો ગન્ધીવિશારદઃ ॥ ૧૦૪॥

મઙ્ગળં મઙ્ગળાકારો મઙ્ગળવાદ્યવાદકઃ ।
મઙ્ગળીશો વિમાનસ્થો વિમાનૈકસુનાયકઃ ॥ ૧૦૫॥

બુધેશો વિવિધાધીશો બુધવારો બુધાકરઃ ।
બુધનાથો બુધપ્રીતો બુધવન્દ્યો બુધાધિપઃ ॥ ૧૦૬॥

બુધસિદ્ધો બુધપ્રાણો બુધપ્રિયો બુધોબુધઃ ।
સોમઃ સોમસમાકારઃ સોમપાઃ સોમનાયકઃ ॥ ૧૦૭॥

સોમપ્રભઃ સોમસિદ્ધો મનઃપ્રાણપ્રણાયકઃ ।
કામગઃ કામહા બૌદ્ધ કામનાફલદોઽધિપઃ ॥ ૧૦૮॥

ત્રિદેશો દશરાત્રીશો દશાનનવિનાશકઃ ।
લક્ષ્મણો લક્ષસમ્ભર્તા લક્ષ્યસઙ્ખ્યો મનઃપ્રિયઃ ॥ ૧૦૯॥

વિભાવસુર્નવેશાનો નાયકો નગરપ્રિયઃ ।
નરકાન્તિર્નલોત્સાહો નરદેવોનલાકૃતિઃ ॥ ૧૧૦॥

નરપતિર્નરેશાનો નારાયણો નરેશ્વરઃ ।
અનિલો મારુતો માંસો માંસૈકરસસેવિતઃ ॥ ૧૧૧॥

મરીચિરમરેશાનો માગધો મગધપ્રભુઃ ।
સુન્દરીસેવકો દ્વારી દ્વારદેશનિવાસિનઃ ॥ ૧૧૨॥

દેવકીગર્ભસઞ્જાતો દેવકીસેવકી કુહુઃ ।
બૃહસ્પતિઃ કવિઃ શુક્રઃ શારદાસાધનપ્રિયઃ ॥ ૧૧૩॥

શારદાસાધકપ્રાણઃ શરદીસેવકોત્સુકઃ ।
શારદાસાધકશ્રેષ્ટો મધુપાનસદારતિઃ ॥ ૧૧૪॥

મોદકાદાનસમ્પ્રીતો મોદકામોદમોદિતઃ ।
આમોદાનન્દનો નન્દો નન્દિકેશો મહેશ્વરઃ ॥ ૧૧૫॥

નન્દિપ્રિયો નદીનાથો નદીતીરતરુસ્તથા ।
તપનસ્તાપનસ્તમા તાપહા તાપકારકઃ ॥ ૧૧૬॥

પતઙ્ગગોમુખો ગૌરગોપાલો ગોપવર્ધનઃ ।
ગોપતિર્ગોપસંહર્તા ગોવિન્દૈકપ્રિયોઽતિગઃ ॥ ૧૧૭॥

ગવ્યેષ્ઠો ગણરમ્યશ્ચ ગુણસિન્ધુર્ગુણાપ્રિયઃ ।
ગુણપૂજ્યો ગુણોપેતો ગુણવાદ્યગુણોત્સવઃ ॥ ૧૧૮॥

ગુણીસકેવલો ગર્ભઃ સુગર્ભો ગર્ભરક્ષકઃ ।
ગામ્ભીરધારકો ધર્તા વિધર્તા ધર્મપાલકઃ ॥ ૧૧૯॥

જગદીશો જગન્મિત્રો જગજ્જાડ્યવિનાશનઃ ।
જગત્કર્તા જગદ્ધાતા જગજ્જીવનજીવનઃ ॥ ૧૨૦॥

માલતિપુષ્પસમ્પ્રીતો માલતીકુસુમોત્સવઃ ।
માલતીકુસુમાકારો માલતીકુસુમપ્રભુઃ ॥ ૧૨૧॥

રસાલમઞ્જરીરમ્યો રસાલગન્ધસેવિતઃ ।
રસાલમઞ્જરી લુબ્ધો રસાલતરુવલ્લભઃ ॥ ૧૨૨॥

રસાલપાદપાસીનો રસાલફલસુન્દરઃ ।
રસાલરસસન્તુષ્ટો રસાલરસસાલયઃ ॥ ૧૨૩॥

કેતકીપુષ્પસન્તુષ્ટઃ કેતકીગર્ભસમ્ભવઃ ।
કેતકીપત્રસઙ્કાશઃ કેતકીપ્રાણનાશકઃ ॥ ૧૨૪॥

ગર્તસ્થો ગર્તગમ્ભીરો ગર્તતીરનિવાસિનઃ ।
ગણસેવ્યો ગણાધ્યક્ષો ગણરાજો ગણાહ્વયઃ ॥ ૧૨૫॥

આનન્દભૈરવો ભીરુર્ભૈરવેશો રુરુર્ભગઃ ।
સુબ્રહ્મ્યભૈરવો નામભૈરવો ભૂતભાવનઃ ॥ ૧૨૬॥

ભૈરવીતનયો દેવીપુત્રઃ પર્વતસન્નિભઃ ।

ફલશ્રુતિઃ

નામ્નાઽનેન સહસ્રેણ સ્તુત્વા બટુકભૈરવમ્ ॥ ૧૨૭॥

લભતે હ્યતુલાં લક્ષ્મીં દેવતામપિ દુર્લભામ્ ।
ઉપદેશં ગુરોર્લબ્ધ્વા યોગેન્દ્રમણ્ડલી ભવેત્ ॥ ૧૨૮॥

તસ્મિન્યોગે મહેશાનસ્સર્વાસિદ્ધિ મવાપ્નુયાત્ ।
લક્ષમાવર્તયેન્મન્ત્રી મન્ત્રરાજં નરેશ્વરઃ ॥ ૧૨૯॥

નિત્યકર્મસુ સિધ્યર્થં તત્ફલં લભતે ધ્રુવમ્ ।
સ્તવમેનં પઠેન્મન્ત્રી પાઠયિત્વા યથાવિધિ ॥ ૧૩૦॥

દુર્લભાં લભતે સિદ્ધિં સર્વદેવનમસ્કૃતામ્ ।
ન પ્રકાશ્યં ચ પુત્રાય ભ્રષ્ટેષુ ન કદાચન ॥ ૧૩૧॥

અન્યથા સિદ્ધિરોધઃ સ્યાચ્ચતુરો વા ભવેત્ પ્રિયઃ ।
સ્તવસ્યાસ્ય પ્રસાદેન દેવનાકમતિપ્રિયઃ ॥ ૧૩૨॥

સઙ્ગ્રામે વિજયેચ્છત્રૂન્માતઙ્ગાનિવ કેસરી ।
રાજાનં વશયેત્સદ્યો દેવાનપિ શમં નયેત્ ॥ ૧૩૩॥

કિમપરં ફલં પ્રાપ્ય સ્તવરાજસ્ય કથ્યતે ।
યદ્યન્મનસિ સઙ્કલ્પસ્તવમેતદુદીરિતમ્ ॥ ૧૩૪॥

તત્તત્પ્રાપ્નોતિ દેવેશ બટુકસ્ય પ્રસાદતઃ ।
આપદાં હિ વિનાશાય કારણં કાન્તદુર્લભમ્ ॥ ૧૩૫॥

દેવાસુરરણે ઘોરે દેવાનામુપકારકમ્ ।
પ્રકાશિતં મયા નાથ તન્ત્રે ભૈરવદીપકે ॥ ૧૩૬॥

અપુત્રો લભતે પુત્રાન્ ષણ્માસે ચ નિરન્તરમ્ ।
પઠિત્વા પાઠયિત્વાऽપિ સ્તવરાજ મનુત્તમમ્ ॥ ૧૩૭॥

દરિદ્રો લભતે લક્ષ્મી માયુઃપ્રાપ્તિમતિશ્ચિરમ્ ।
કન્યાર્થી લભતે કન્યાં સર્વરૂપસમન્વિતામ્ ॥ ૧૩૮॥

પ્રદોષે બલિદાને ચ વશયે દખિલં જગત્ ।
વટે વા બિલ્વમૂલે વા રમ્ભાયાં વિપિને વને ॥ ૧૩૯॥

જપે ત્સતતમાલક્ષ્ય મન્ત્રરાજસ્ય સિદ્ધયે ।
વર્ણલક્ષં જપેદ્વાપિ દિઙ્માત્રં હિ પ્રદર્શિતમ્ ॥ ૧૪૦॥

પૂજયેત્તુતિલૈર્માષૈર્દુગ્ધૈર્માસૈર્ઝષૈસ્તથા ।
ધૃતપક્કાન્નતો વાપિ વ્યઞ્જનૈ રસસઙ્કુલૈઃ ॥ ૧૪૧॥

પૂજયેદ્ધારયેદ્વાપિ સ્તવમેનં સુસાધકઃ ।
પઠેદ્વા પાઠયેદ્વાપિ યથાબિધિ સુરપ્રિયે ॥ ૧૪૨॥

શત્રુતો ન ભયં તેષાં નાગ્નિચૌરાસ્ત્રજં ભયમ્ ।
જ્વરાદિસમ્ભવં ચાપિ સત્યં સત્યં મહેશ્વરિ ॥ ૧૪૩॥

ભૈરવારાધને શક્તો યો ભવેત્સાધકઃ પ્રભો ।
સદાશિવઃ સવિજ્ઞેયો ભૈરવેણેતિ ભાષિતમ્ ॥ ૧૪૪॥

શ્રીમદ્ભૈરવરાજસેવનવિધૌ વૈયાઘ્રમાસેદુષઃ

પુંસઃ પઞ્ચવિધા ભવન્તિ નવધા હ્યષ્ટૌ મહાસિદ્ધયઃ ।
ક્ષોણીપાલકિરીટકોટિમણિરુઙ્માલામરૈર્ભૂઘ્રશો
મૌદ્ગ્યમ્પાદપયોજયોર્નિવહતે મૂર્ધ્નિપયસ્સિચ્યતામ્ ॥ ૧૪૫॥

ઇતિ ભૈરવતન્ત્રે દેવીહરસંવાદે શ્રીબટુકભૈરવસહસ્રનામસ્તોત્રં
સમ્પૂર્ણમ્ ॥

Encoded and proofread by Rajnarayanan C K

*Shri Batukabhairava Sahasranamastotram 1-1*

pdf was typeset on October 27, 2025

Please send corrections to *sanskrit@cheerful.com*